卐 श्रीः 卐

# श्रीसीतासुधानिधिः

प्रणेता

धर्मचक्रवर्ती कविकुलरत्न, महाकवि
श्रीचित्रकूटतुलसीपीठाधीश्वर जगद्गुरु रामानन्दाचार्य
**स्वामी रामभद्राचार्य जी महाराज**
जीवनपर्यन्त कुलाधिपति
जगद्गुरु रामभद्राचार्य विकलाङ्ग विश्वविद्यालय,
चित्रकूट ( उ०प्र० )

प्रकाशक
जगद्गुरु रामभद्राचार्य विकलाङ्ग विश्वविद्यालय
चित्रकूट ( उ०प्र० )

**प्रकाशक-**
जगद्गुरु रामभद्राचार्य विकलांग विश्वविद्यालय,
चित्रकूट (उ.प्र.) २१०२०४

**प्रथम संस्करण-**
श्रीगुरुपूर्णिमा संवत् २०६८, (१५ जुलाई २०११)

**सर्वाधिकार** - प्रणेताधीन

**Available From:** www.jagadgururambhadracharya.org

**मुद्रक-**
श्रीराघव प्रिंटर्स
जी-१७, तिरुपति प्लाजा (निकट बच्चा पार्क)
मेरठ (उ.प्र.)
केवल मुद्रण कार्य

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved.
http://jagadgururambhadracharya.org/

卐 श्रीः 卐

# प्राङ्निवेदनीयम्

**पुण्यारण्यभुवं सीतामादिशक्तिं खरद्विषः।**
**रामस्य पूर्णकामस्य स्तुवे तां लोकमातरम्।।**

अयि सुरभारतीभासुरहृदयाः सहृदया विद्वद्वृन्दारकाः, गीर्वाणवाणी-रसिकस्वान्ताः प्रशान्ताः विदाङ्कुर्वन्तु तत्र भवन्तो भवन्तः। इहलोके चामुत्र निःश्रेयसाभ्युदयप्राप्तये श्रीसीतारामोपासनमन्तरेण नान्यत् किञ्चिदयनम्। इति सर्वेषामैकमत्येन निश्चप्रचोराद्धान्तः। ''नान्यःपन्था विद्यतेऽयनाय'' इति श्रुतेः। तत्र च मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसीति मम नुः साम्रेडमस्मत् प्रतीपपक्षिणोऽपि। सा च भक्तिः भगवतीं दयागुम्फितचेतस्वकीं जनकनन्दिनीं श्रीसीतामधिशेते तस्याः श्रीरामाभिन्नत्वात् प्रणिगदति च तत्रभवान् प्राचेतसः श्रीसीतामुखेनैव-

**''अनन्या राघवेणाहं भास्करेण यथा प्रभा''।**

तस्मात् श्रीसीताद्वारकत्वाद्भक्तेः सिद्धान्त तत्त्वाच्च तस्याः श्रीराघवाभिन्नतया तद्गुणगणश्रवणकीर्तनादि भक्तेः प्रापकमिति। तदेव समवधार्य धारणायां श्रीजनकनन्दिनी सीताप्राकट्यस्थलं पुण्यारण्यं पुनौरेति साम्प्रतिकमभिधानं समुपेत्य सीतागुणगणसन्धुक्षितविमलचेतसा मया विगत माधवशुक्लप्रतिपदमारभ्य यावत् सीतानवमीं श्रीसीतासुधानिधिनामधेयः सङ्कलित सैरध्वजी रूपधेय नामधेय भागधेय भागधेयाऽप्रमेयः सुज्ञेयः सुगेयः स्तोत्रकाव्यविशेषः प्रण्यनीयत्।



अत्र चत्वारस्तरङ्गाः समुद्घाटितश्रीसीताभक्तिरसान्तरङ्गाः समुत्सारित विषयबहिरङ्गाश्चकासति। श्रीसीताकुण्डं समया सभक्तिभावं निषीदता प्रसीदता मया ये ये भावासमन्वभाविषत् त एवाधि भणिति समभाणिषत्। छन्दांसि च श्रीमैथिलीभक्तिरसानुरूपाणि श्रीसैरध्वजी प्रेरणयैव निबद्धानि विनिर्बन्धनानि वसन्ततिलका शार्दूलविक्रीड़ितेन्द्रवज्रोपेन्द्रवज्रोपजातिमन्दाक्रान्ताद्रुतविल-म्बितानुष्टुप्वैतालिकमालिनीशिखरिणीवंशस्थानि। ग्रन्थोऽयं मया निर्मितैति सहसाहमपि न प्रत्येमि। स्वप्रियतमा गुणगणवर्णनचटुलचेतसा परमात्मना श्रीराघवेण भगवता रामेणैव मद्गवीं निमित्तीकृत्य रचितोऽयंभूतार्थोयमेव। श्रीसीतासुधानिधि मानं मानं स्वादं स्वादं समनुशीलं समनुशीलं श्रीसीताचरण-नलिनोपासकाः कृत्कृत्या भवन्त्विति भव्यमाशासानो विरमति।

**राघवीयो जगद्गुरुरामानन्दाचार्यस्वामिरामभद्राचार्यः**

**श्रीराघवः शन्तनोतु**

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved.

http://jagadgururambhadracharya.org/

卐 श्रीः 卐

नमो राघवाय

श्रीसीतासुधानिधौ

# प्रथमस्तरङ्गः

देहश्रियाविजितचम्पकचारुशोभा
श्रीरामचन्द्रचरणाम्बुजलब्धलोभा।
सौम्या समस्तजगतां जननी जयाढ्या
सीता सदा विजयते गुरुदैवतं नः।।१।।

यस्याः पदाब्जरजसो विरजा विरेजु-
र्गौरीन्दिराद्रुहिणगेहजुषां च कोट्यः।
जाता जया जनकवत्सलसागरेन्दु
पूर्णामृता जयति सा धरणीकिशोरी।।२।।

यस्या गुणार्णवमनन्तयुगैरनन्तो
गाढुं न चालमतिलज्जित एव भाति।
सा रामचन्द्रमुखचन्द्र चकच्चकोरी
मन्मानसे विलसतान्मिथिलाकिशोरी।।३।।

यन्मंजुलाननसरोजमनोज्ञभृङ्गो
भूमा बुभूषति भवन्नपि भव्यभव्यः।
रामोऽपि तत्परिमलाहृतचारुचेता
जागर्ति सैव जननी जगतीह सीता।।४।।

यत् पादपङ्कजपरागमलंजुषाणा
लोकत्रयस्य विभवं सुकृतैर्मुषाणा।
सीतापतेः पदपयोजरतिं पुषाणा
नाद्यापि जातु शिथिला मिथिला मिमीते।।५।।

यस्याः सुधाधरसुधां सततं सतृष्णः
पेपीयमान इहहृत्स्थपदारविन्दः।



मोघी भवच्छ्रुतिवचोऽवकलय्य जिह्न-
द्रामो द्विरेफतनुरप्यवदेकरेफम्।।६।।

**विशेष :** इः कामः तं हन्ति इति इहः शिवः तस्य हृदि तिष्ठतः पदारविन्दे यस्य स इहहृत्स्थपदारविन्दः।

यद्रूपसौभगसुधानिधिमग्नसत्वो-
ऽनन्तोऽप्यहो जहदसौ समनन्ततां स्वाम्।
आनन्दसिन्धुरपि राम उदूढतेजा
आनन्दमाप परमा ननु सैव शक्तिः।।७।।

यस्या मुखाम्बुरुहसारघमक्ष्यलिभ्या-
मापीय दत्तपरभामिनिदृक्तिलाम्बुः।
रामो रराज दयिताव्रतिमौलिरत्नं
को वर्ण्यतां पर इतो गरिमावनेय्याः।।८।।

यस्याः कराब्जपरिमृष्टकलत्कपोलः
श्रीखण्डसिक्तमिव नैजवपुर्विविद्वान्।
न ब्रह्ममर्शनसुखं बहुमेन ईशो
भौमी विभाति भुवि सैव महीशमाया।।९।।

यस्याः कृपाकलितकप्रकटाक्षपातं
ब्रह्मादयः सुरगणा स्पृहयन्त आर्याः।
तेपुस्तपांसि तनुतापमथोग्रतापं
सा जानकी जरयतान् मम भावजूर्तिम्।।१०।।

श्री श्रेयसे त्रिजगतां जगतां च भर्तु-
र्द्राक् प्रेयसे प्रियपते रघुनन्दनस्य।
आविर्बभूविथ भुवो भुवनैकमात-
र्मातामही ननु मही महिता ततोऽभूत्।।११।।

त्वं सूयसे जगदिदं निजमाययाद्धा
शं सूयसे रघुपतेः शरणैषिणां त्वम्।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.
http://jagadgururambhadracharya.org/

कं सूयसे कुशिकजाध्वररक्षिभाजां
सीतेति नाम रुचिरं तत आबिभर्षि।।१२।।
नारायणाम्बुजजनि त्रिदृगादिदेवान्
लोकांश्च लोकपसुरांस्तदुपासकांश्च।
देवीस्तथैव सकलाः सकलास्त्वमद्धा
सीते सवस्स्यत उदीर्यश एव सीता।।१३।।
त्वं स्यस्यनर्थनिवहान् ननु रामचन्द्र-
श्रीपादपङ्कजजुषां शुचिभक्तिभाजाम्।
लोकांश्च संहरसि सृष्टिलये हरेण
ख्यातासि देवि जगतीति ततोऽपि सीता।।१४।।
सीते स्यसि त्वमखिलान् रघुनाथभक्त-
क्लेशान् हरेर्भजनबाधकविघ्नलेशान्।
संसारकाननपरिभ्रमणश्रमान् वै
संख्यायसे समुचितं तत एव सीता।।१५।।
त्वं वै सुवस्यखिलजीवनिकाय सत्वं
सत्कर्मणेऽजरतये श्रुतिबोधिताय।
भक्त्यै सुवाहुमथनस्य जनानशेषान्
सीता ततोऽसि विदिता भुवनेषु सीते।।१६।।
यत् पादपङ्कजपरागरसानुराग-
खड्गात् खडन्ति मुनयो भवबन्धनानि।
रामं सिनोषि तमहो निजभावरज्वा
सीतेति नाम समगास्त्वमतो जगत्याम्।।१७।।
यां त्वां मही महितमङ्गलमंजुमूर्तिं
कृन्तन्ति कश्मलभयं भवबन्धमीड्याः।
सा सीयसे त्वमनघे रघुपुङ्गवेन
स्निग्धं भुजव्रतितितोऽसि ततोऽपि सीता।।१८।।



नानाविधाप्तजनुषं जनतां च नाना-
कर्मानुगां विविधजातिगतां विचित्राम्।
राष्ट्रेष्वहो विविधदृक्प्रभवेषु भक्त्या
त्वं वै सिनोषि नृहरेर्जगतीह सीते।।१९।।
त्वं स्यायसे विबुधवन्द्यपदारविन्दे
भक्त्या स्मृता निखिलजीवदृगब्जवर्त्म।
आयोध्यकान् वनपथान् कपिकौणपादीन्
सीतेति नाम दधती तत आचकाषी।।२०।।
क्षेत्रं हलेन कृषतः क्रतवे कृतीष्टं
सीरध्वजस्य जनकस्य जनाधिपस्य।
सीतात उत्थित तनुस्तनुषे त्रितापं
सीताभिधानमधिगम्य सतां सदा त्वम्।।२१।।
रामो विलालसितु जानकीजानिरेव
भूजानिरस्तु नहि कर्हिचिदाजिसूनुः।
श्वश्रू कृता रघुपतेर्धरणी त्वयात-
स्तस्याः प्रभूय चकतात्तव चातुरी नः।।२२।।
पृथ्वी पुरैव मधुकैटभमेदसोऽभूत्
ख्याताऽशुचिस्तत इयं ननु मेदिनीति।
तां पावयन्त्यहह पावितपापिपूगा
गां जग्मुषि शुचितया जितकोटिगङ्गा।।२३।।
भूमिर्वराहपरिरंभणतोऽतिपापं
गर्भं बभार नरकं जठरे महीयम्।
कौलीनमेनमिव नाशयितुं कुलीना
जाता भुवोऽसि नरकान्तक नामध्येया।।२४।।
भूमिर्विखण्डिततनुर्बहुभिर्नृपालै-
र्भूक्ता श्रुताथ कुलटेति कलंकपङ्कम्।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved.

http://jagadgururambhadracharya.org/

हर्तुं चकर्थ जनकं जनकं जनन्या
भूमेःपतिं कलति ते कलना कलाढ्ये।।२५।।
संक्रीडते रघुवरो धृतबालरूपो
भूमौ निरावरण वर्ण्य वनोद्भवाङ्घ्रिः।
मूर्ध्ना निवोढुमिव रामपदाब्जरेणुं
भूता भुवो भुवनभूरपि भूमभूया।।२६।।
आधारभूतविभवा विभवा त्रिलोक्या
आधारहृत् सरसिजा रघुपुङ्गवस्य।
आधारभूः पदसरोजजुषां जनानां
आधारशक्तिमितिगां जननीमकार्षीः।।२७।।
सर्वं प्रसह्य सहनीयमहो मयास्मिन्
लोकेऽविलोकित मदीयगुणात्मलोके।
एवं विभाव्य भवभामिनिभव्यभव्ये
सर्वंसहां वसुमतीं जननीं चकर्थ।।२८।।
लीलावतारमहमंजुलरङ्गभूमौ
क्षन्तव्यमेव शमलं जनपापपूगम्।
क्षम्याणि शक्रसुतमुख्यकृतानि मात-
स्तस्मात् क्षमां स्वजननीं क्षमयाऽकृथास्त्वम्।।२९।।
त्वं भुक्तिमुक्तिमयमङ्गलमंजुबीजं
नित्यं विभर्षि जगदेव चराचरं च।
विश्वं पदाम्बुजजुषां भगवत्प्रपत्तिं
विश्वंभरां तत इमां जननीं व्यधत्थाः।।३०।।
प्राहुर्महीं वसुमतीं वसुधांच केचिद्
केचिद् गृणन्ति धरणीं च वसुन्धरां वै।
तन्नाम सत्यमिह कर्तुमहो धरण्या
रक्षोद्विषो वसुमयी तत आविरासीः।।३१।।



दृष्ट्वोसराणि बहुशो धरणीसराणि
सन्दिह्यते जनतया स्म तदुर्वरात्वे।
कौलीनमेनमवनेश्च निराचिकीर्षुः
प्रादुश्चकर्थ निधिसेवधिमात्ममूर्तिम्।।३२।।
दुग्धा वसूनि वसुधा पृथुनाऽप्रथिम्ना
पूर्वं पुराणपुरुषेण विगव्यतां च।
तस्यां विभाव्य गविकामदुघात्वमाधाः
गव्यात्मना विजयते गुरुगौरवं ते।।३३।।
यज्ञेन यज्ञमयजन्त सुरा इतीमां
मन्त्रश्रुतिं समवधार्य जगज्जनन्या।
सा यज्ञिया च मिथिला समधायि पुण्या-
रण्यात्मिका स्वजनुषो भवभव्यभूमिः।।३४।।
गङ्गात्मजा भगवतो महिता च माता
श्रीगण्डकीति गदितं च पुराणरत्नैः।
तन्मध्यगां च मिथिलां स्वभुवं पुटन्ती
पारम्परीं हरिरतेः प्रथयाञ्चकर्थ।।३५।।
गङ्गा भविष्यति भवेन्महिता ननान्दा
श्वश्रुत्वमाकलयतान्मम गण्डकी वै।
ताभ्यां प्रशिक्षितचरीव वधूत्तमाहं
भूयासमित्यनुगुणा जनुषः प्रथा ते।।३६।।
वृद्धिं गमिष्यति यदत्र षडागमान्तं
पारंपरी कपिलमुख्यप्रवर्तकानाम्।
भक्तिं विनैव मिथिला शिथिला हि मा भूत्
इत्यात्मनैव किल तां समलंचकर्थ।।३७।।
न्यायस्य षोडशपदार्थविचारणायां
सत्तर्ककर्कशधियां ननु मैथिलानाम्।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved.
http://jagadgururambhadracharya.org/

सारस्यमर्पयितुमेव रसैकसिन्धुः
प्राकट्यमत्र विदधे मिथिलाधरण्याम्।।३८।।
ध्यात्वा निराकृतिनिरंजननिर्विशेषं
तद्ब्रह्म निर्गुणमपास्तसमस्तभावम्।
निर्भक्ति नीरसहृदो सरसान् विधातुं
भक्त्या बभूविथ शुभे मिथिलाजिरे त्वम्।।३९।।
धन्या पुरीमणिरियं मिथिला वदान्या
धन्यो ह्ययं जनपदस्त्र्यहुतिर्हुताग्निः।
धन्यं सुधाममहितं महितं च पुण्या-
रण्यं त्वमाविरभवः किल यत्र सीते।।४०।।
चेत्कोटयः फणिभृतां गिरिजेन्दिराणां
हेरम्बसाम्बशिवनारदशारदानाम्।
वक्तुं न चालमथकल्पशतानि पुण्या-
रण्यस्य पुण्यमनघे भवती भवस्य।।४१।।
प्राकट्यतस्तव विभो विमलावतांभो
यज्जातु जातमघकाननधूमकेतुः।
नाद्यापि शुष्यति न रुष्यति पुष्यतीदं
प्रेमेव पावितपुमर्थमजन्ममूर्त्योः।।४२।।
गङ्गार्बुदानि यमुनाशतखर्बुदानि
त्वानि प्रभान्तु भुवितीर्थजलानि कामम्।
साम्यं न यान्ति सकलानि तथापि सीता-
कुण्डाम्बुसीकरकलार्बुदभागकस्य।।४३।।
यद्वारि वारयति कारिशिरोविहारि-
वारोऽघनाशनविरूढमहावलेपम्।
तत् पार्थिवीपदपयोजपरागरागा-
न्मीलन्मरन्दमिह माममलीकरोतु।।४४।।
सैरध्वजीपदपयोरुहसत्पराग-



रागाप्तमंजुमकरन्दमहोमहाम्भः।
शं रातु मे जनकजापतिपादपद्म-
सेवैकसारसुभगां ननु भक्तिमीड्याम्।।४५।।
भक्तिर्द्विधा प्रकटिता जनकस्य राज्ञः
सीरान्महीसुरगवीनवगव्यदेहा।
नार्याकृतिः प्रथमजाजसुतस्नुषा त्वं
नीराकृतिस्त्विह विराजते पुण्यकुण्डे।।४६।।
श्रीजानकीचरणवारिजवारिजातं
मोमुद्यमानमलयोद्भववल्गुवातम्।
सीतं सुधैकविभवं विभया विभातं
नीरं मनोऽमलयतां नितरामधीरम्।।४७।।
सीतापरप्रकटितप्रथमैकसाक्षी
गङ्गादिदिव्यसरिदर्चितभागधेयम्।
श्रीजानकीचरणपङ्कजपङ्ककाण्डं
कुण्डं हि कुण्डतु मनो मम भक्तिवारि।।४८।।
श्रीजानकीप्रकटितोत्सव एत्य यस्मिन्
गङ्गादयो निजतनुं स्नपयांबभूवुः।
तज्जानकीचरणरेणुमयं च सीता-
कुण्डं नमामि धृतरामरतिप्रकाण्डम्।।४९।।
ब्रह्मद्रवः किमुत कुण्डगतो वनात्मा
किं वा रसो रसमयो मधुरश्रुतीनाम्।
जाने जनावनपरा किल पुण्यकुण्डे
सीतैव वारिवपुषा वरमाबिभर्ति।।५०।।
किं पुण्यपुंजममलं हलरूपमेतत्
सीरध्वजस्य सुकृतं यदि वा रघूणाम्।
जानामि लौल्यमहिमैव हि वैष्णवानां
सीतोद्भवे हलवपुर्ह्यभवन्निमित्तम्।।५१।।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.
http://jagadgururambhadracharya.org/

मासं मनोहरतमं मृदुमाधवाख्यं
सन्माधवीमुखरमंजुमधुव्रताढ्यम्।
वन्दे वदान्यचरितं चरितेश्वरीश्रीः
सीता चकार यमहो निजजन्मकालम्।।५२।।
नौमीड्यकीर्तिकलितां नवमीं च भौमीं
शक्तिं यथा भगवतो नवमीमनर्घाम्।
शुक्लां सुशुक्लितजनामभिजिन्मुहूर्तां
यस्यां कुतः प्रकटिता जगदेकमाता।।५३।।
वन्दे विदेहमवनीरमणं रघूणां
संबन्धिनं समधियं श्रितयोगभोगम्।
यद्भक्तिभावितमना जननी त्रिलोक्याः
सीता बभूव तनया तनुशीलितश्रीः।।५४।।
इत्थं जगद्गुरुमहाकविरामभद्रा-
चार्येण वै गिरिधरेण सुगीतसीते।
सीतासुधानिधिमये रघुरामसीता-
भक्तिं प्रयच्छतु च नः प्रथमस्तरङ्गः।।५५।।
इति प्रथमस्तरङ्गः।



© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved.

http://jagadgururambhadracharya.org/

卐 श्रीः 卐

नमो राघवाय

### श्रीसीतासुधानिधौ

## द्वितीयस्तरङ्गः

भित्वा भूमिमुदारचारुचरितां सैरध्वजाल्लाङ्गलाद्
भूतां भूरिविभूतिभूतविभवां भूमैकभूतिं भुवम्।
लोकानां ननु मातरं भगवतीं सौन्दर्यसीमां शुभां
सीतां शीतकराननां गुणवतीं वन्देऽनवद्यामहम्।।१।।
खेलन्तीं मिथिलावनाववनिजां कारुण्यकल्लोलिनीं
कांचित्कान्तगुणालकां सुललनां लालित्यलक्ष्मीमयीम्।
लक्ष्मीनामपि लक्ष्मिलालितपदां लक्ष्मीं विदेहात्मजां
वन्दे वन्द्यपदारविन्दयुगलां वन्दारुकल्पद्रुमाम्।।२।।
खेलन्ती शुकसारिकाभिरनघा चन्द्रानना बालिका
शोभाव्रीडितचारुचम्पकलता मन्दस्मिता मानिता।
श्रीमन्मैथिलवंशवैभवकरी माधुर्यमन्दाकिनी
मान्या मान्यमना मनाङ्मृगदृशी सीता कदा द्रक्ष्यते।।३।।
पुंजीभूतमतां फलं सुनयनापुण्यस्य पुण्यप्रभां
गुण्यां गुण्यनिजुष्टपङ्कजपदां पद्माननां पद्मिनीम्।
पद्माभ्यर्चितपादपद्मयुगलां स्निग्धां किशोरीमहं
कर्तास्म्यक्षिपथातिथिं शुभतिथिं सानन्दमार्यां कदा।।४।।
मातर्मैथिलिमंजुकंजवदने मन्दस्मिते मन्दिते
ब्रह्माद्यैर्विवुधैरशेषदनुजैः शेषादिभिस्सूरिभिः।
श्रीसूर्यान्वयमंजुकम्रकुमुदश्रीचन्द्रलेखेऽखिलान्
त्रायस्वाम्ब वनाग्नितोऽतिविषमात् कारुण्यकल्लोलतः।।५।।
शम्पाचम्पकजातरूपवपुषं सौन्दर्यसारात्मिकां
शोभाव्रीडितकोटिकोटिरतिकां वात्सल्यवारान्निधिम्।



बालां बालमृगीसमाननयनां कांचित् किशोरीमहं
सेवे सौभगसेवधिं निरवधिं कल्लोलिनीं कारुणीम्।।६।।
क्रीडन्तीं स्वसखीभिरात्मनिरतामष्टाभिरात्मत्विषा
मुष्णन्तीं नयनानि कंजनयनां सन्नागराणां मुहुः।
साम्रेडं जनकेन वीक्षितविभां स्निग्धात्मना लालितां
तां कुर्वीय कदा पुरो नयनयोः सीताभिधां बालिकाम्।।७।।
तिष्ठन्तीं पितुरग्रतो क्वचिदथो दूरं व्रजन्तीं क्वचित्
धावन्तीं चटकां ग्रहीतुमनसं मान्तिं क्वचित् कुड्यतः।
खेलन्तीं प्रतिबिम्बतः क्वचिदिमां मन्दं हसन्तीं क्वचित्
तां ध्यायामि धिया धराप्तजनुषं कन्यां जयां जानकीम्।।८।।
उत्सङ्गं जनकस्य बालरभसाप्यारोढुकामां मुहु-
र्धावं धावमुदारकिल्कितकलामव्यक्तवाचं शिशुम्।
स्निग्धैः कुंचितकुन्तलैर्परिवृतां पूर्णेन्दुतुल्यानने
केशोत्सारणतत्परां स्वकरजैः कां कन्यकां के श्रये।।९।।
विभ्राणां कलनूपुरे चरणयोश्चामीकरत्विट्तनुं
चंचद्बालमृगीदृशं दृशिमतां दृक्स्वस्तिशोभामहम्।
गत्या बालमरालिकां च तुदतीं तोषप्रदां वै सतां
ध्यायेयं जनकस्य तां सुनयनाजीवातुभूतां सुताम्।।१०।।

जनकनन्दिनि नन्दिनिनन्दिनि
स्फुटसुधारससारसचन्दिनि।
विबुधवन्दितवन्दिनि भक्तितो
झटिति मामिह मातरूपार्द्रय।।११।।
यदि न चेत् क्षमसे क्षमया सति
प्रबलपातकपर्वतमेव मे।
दलयितुं क्षमया किमु वै ततः
प्रकटितासि सुतीकृतविग्रहा।।१२।।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved

http://jagadgururambhadracharya.org/

जगति घोरमहागसमेव मां नहि सुरा नृवरा न समादधुः।
शरणमेमि ततो भवतीमहं त्यज न भो शरणागतवत्सले।।१३।।
यदि जहासि जनं किल जानकि व्रजतु कुत्र तदायमलोचनः।
यदि तृषार्तमनाद्रियते घटा उपरमेन्न तदा किमु चातकः।।१४।।
अघचयं क्षमितुं शरणैषिणां जननि वै समधा जननीं क्षमाम्।
ननु ममैव प्रकर्ण इलासुते कथय देवि गता क्व नु ते क्षमा।।१५।।
यदि जयन्त कृते दयसे शुभे कृपयसे यदि रात्रिचरीषु वै।
जनकनन्दिनि किं न ततो मयि न दयसे न कृपां कुरुषे वद।।१६।।
किमु जयन्तवदाचरमप्रियं किमु निशाचरिवच्च कटूक्तवान्।
उभय भावत एव बहिर्गतं नृपतिनन्दिनि मां किमुपेक्षसे।।१७।।
यदि न चेत् क्षमसे मम पातकं पतितपावनि पापशिरोमणेः।
तत उपेत्य रुषा परिताडय प्रवलदण्डविधानमयं कुरु।।१८।।
जननि तर्जय सर्जय यातनां प्रखरभार्ष्ट्रमये किल भर्जय।
उभयथा समुपेक्षितुमेव ते समुचितं नहि पार्थिवनन्दिनि।।१९।।
न खलु मे दुरितं क्षमसे शुभे नहि पुनः किल दण्डयसे हि माम्।
न खलु तारणमेव न मारणं उभयथा गलबन्धमहं गतः।।२०।।
नमो नमस्ते विलसत्प्रभायै शम्पाकनत्कांचनसद्विभायै।
स्वतेजसावर्धितगौरिलक्ष्म्यै सीताभिधायै नृपकन्यकायै।।२१।।
नमोऽस्तु ते तेजसि संभृतायै भूम्या स्वगर्भे महसे धृतायै।
पतिव्रतायै जनसत्कृतायै सीताभिधायै नृपतेः सुतायै।।२२।।
नमोऽस्तु ते शीलितशैलजायै नमोऽस्तु ते शोधितसिन्धुजायै।
नमोऽस्तु ते धर्मितधर्मजायै नमो नमस्ते जनकात्मजायै।।२३।।
नमोऽस्तु रामाम्बकतारकायै नमोऽस्तु सद्वैष्णवतारिकायै।
नमोऽस्तु वैदेहकुमारिकायै नमो नमस्ते श्रितसारिकायै।।२४।।



नमो नमस्ते कनकप्रभायै नमो नमस्ते विलसद्विभायै।
नमो नमस्ते धृतधन्यकायै नमो नमो मैथिलकन्यकायै।।२५।।
नमोऽस्तु संसारसमुद्भवायै नमोऽस्तु लोकैकलसद्भवायै।
नमोऽस्तु विश्वीयपराभवायै नमो नमो भूतलसंभवायै।।२६।।
नमोऽस्तु विज्ञानविवेकभूत्यै नमोऽस्तु रामैकमहाविभूत्यै।
नमोऽस्तु कारुण्यमनोज्ञमूर्त्यै नमोऽस्तु भौम्यै भवभव्यपूर्त्यै।।२७।।
नमो नमस्ते भगवत्कृपायै नमोऽस्तु नारिमधुरत्रपायै।
नमोऽस्तु पुण्यैकसुरापगायै नमोऽस्तु सौभाग्यकलापगायै।।२८।।
नमो नमस्ते भगवद्भवित्र्यै नमोऽस्तु पापौघमहालवित्र्यै।
नमोऽस्तु माधुर्यमहाधरित्र्यै नमो नमस्ते मिथिलेशपुत्र्यै।।२९।।
नमोऽस्तु योगीश्वरसन्नुतायै नमोऽस्तु ते सद्गुण संयुतायै।
नमोऽस्तु ते धैर्यमहाद्भुतायै नमोऽस्तु ते भूमिपतेः सुतायै।।३०।।
नमोऽस्तु सौन्दर्यसुखैकसीम्ने नमोऽस्तु माधुर्यमहाललाम्ने।
नमोऽस्तु साद्गुण्यमनोज्ञधाम्ने नमोऽस्तु सीताचिरनव्यनाम्ने।।३१।।
नमो महत्यै यदि वाऽमहत्यै नमो वृहत्यै यदि वाऽवृहत्यै।
नमो युवत्यै यदि वाऽयुवत्यै नमो भवत्यै यदि वाऽभवत्यै।।३२।।
यज्जानकीजन्मनिमित्तभूतं पूतं सदीष्टं परमं च पूर्तम्।
सैरध्वजं राजकराग्रमित्रं वन्दे हलं तद् विभुभक्तिलब्ध्यै।।३३।।
नमस्यते सा नवमीव शक्तिर्वैशाखमासस्य शुभा हि शुक्ला।
स्वीकृत्य यां स्वीकृतभूमिभागां सीता प्रतीता प्रकटा बभूव।।३४।।
तन्मङ्गलं नौमि दिनं दिनेशवंशांबुधीन्दोर्य उवाह मोदम्।
यज्जन्मवैवाहिक एव भौम्या भ्रातृत्वरीतिं समलंचकार।।३५।।
यस्मिन् निविष्टां विमलां विशिष्टां ददर्श सीतां प्रथमं विदेहः।
वेदान्तविद्यामिव वेदमन्त्रे तं नौमि सिंहासनमुर्विजायाः।।३६।।
अष्टौ सखीस्ताः प्रणमामि भक्त्यै श्रीचारुशीलाप्रमुखा विभूम्नः।
शक्तीरिवाष्टौ विहिताष्टयामा या सेवया श्रीप्रमुदं प्रतेनुः।।३६।।

© Copyright 2017 Shri Tulsi Peeth Seva Nyas, All Rights Reserved

http://jagadgururambhadracharya.org/

वन्दे महीष्टां महितां महीं तां सैरध्वजीं देवगवीमिवार्याम्।
प्रदाय पुत्रीं जनकाय यापत् पतिव्रतारत्नपदं गताङ्कम्।।३७।।
मातामही सर्वनृणां महीयं महीयमाना महती महिम्ना।
या पार्थिवीपानपयः सिसृक्षुः सरिद्वरां दुग्धमतीमुवाह।।३९।।
नमामि भूयः प्रणमामि पुण्यारण्यं कृतारण्यकपुण्यपुंजम्।
यच्छ्रीपदांभोजपरागरागमरन्दजुष्टं त्रिदिवं जहास।।४०।।
नमामि नित्यां मिथिलां पुरीं तां मिथेन क्लृप्तां निमिराजधानीम्।
यां जानकी स्वीयपदारविन्दपरागमारन्दमहां व्यधत्त।।४१।।
नमोऽस्तु नद्यै कमलाभिधायै सरिद्वरायै महितेश्वरायै।
सीतां जुषाणावततार देवी पयः शरीरा कमलैव कान्ता।।४२।।
नमामि भूयो विमलां विनीतो शक्तिं विभूम्नो विमलां खरारेः।
यस्यां विमज्जन् विकृतोऽपि पापी विधूय पापं प्रथितः पपीर्वा।।४३।।
नमोऽस्तु भूयो जनकात्मजायै नमोऽस्तु भूयो ननु भूमिजायै।
नमोऽस्तु भूयो वसुधानिजायै नमो नमस्ते नम उर्विजायै।।४४।।
नमामि सीताचरणारविन्दमानन्दकन्दं हृतविघ्नवृन्दम्।
वृन्दारकप्रार्थितसन्मरन्दं सौरभ्यलुब्धार्यमनोमिलिन्दम्।।४५।।
यत् प्रह्वणेक्षाविवुधाः प्रतेपुस्तपः सहस्राब्दमधात्मतापम्।
वन्दारुमन्दारमयं महाढ्यं वन्देय भौमीचरणारविन्दम्।।४६।।
सीमन्तरागेण च निर्जरीणां यन्नित्यमारुण्यमवाप पूज्यम्।
यत्सौभगं प्राप दिनेशसूतस्तच्छ्रीपदाब्जं मम शान्तयेऽस्तु।।४७।।
यन्मौखरीवैष्णववैखरीं तां ध्याता सनाथीकुरुते प्रकामम्।
तज्जानकीपादपयोजमित्रं श्रीनूपुरं मेऽस्तु पुरोधिनेत्रम्।।४८।।
यदङ्घ्रिपाथोजरजोजुषाणान् विध्यानमात्रं विमलीकरोति।
स एव सीतापदपद्मरेणुर्मदात्मरेणुं विषमं विमार्ष्टु।।४९।।
यदङ्घ्रिराजीवरजो मरन्दं सकृन्निपीतं प्रपुनाति पापम्।
तदेव मे जानकिजानिपादपाथोजभक्तिं दिशताद्भवाय।।५०।।



संक्रीडमानां मिथिलेशगेहे अष्टाभिरिष्टाभिरलीभिरिष्टाम्।
सिञ्जत्पदाब्जां ननु नूपुरश्रीस्वरेण सीतां प्रणमाम्यहं ताम्।।५१।।
किंजल्कवस्त्रां धृतसर्वशास्त्रां तां ब्रह्मविद्यां श्रितसर्वविद्याम्।
आचार्यवर्यां प्रथमां विदेहपुण्यात्मिकां कांचिदये कुमारीम्।।५२।।
कान्तालकान्तां रतिकोटिकान्तां मन्दस्मितां कम्रकपोलशोभाम्।
श्रीरामपादांबुजलब्धलोभां वन्दे वदान्यां जनकेन्द्रकन्याम्।।५३।।

यस्याः दिगन्तविदिताकमनीयकीर्ति-
र्दिव्यापगाविहितकल्मषपूगभङ्गा।
गङ्गार्बुदं शुचितया लघयांचकार
श्रीजानकी जयति सा निमिवैजयन्ती।।५४।।

इत्थं जगद्गुरुमहाकविरामभद्रा-
चार्येण वै गिरिधरेण सुगीतसीते।
सीतासुधानिधिमये रघुरामसीता-
भक्तिं प्रयच्छतु च नस्तरलो द्वितीयः।।५५।।

इति द्वितीयस्तरङ्गः।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved

http://jagadgururambhadracharya.org/

卐 श्रीः 卐

नमो राघवाय

श्रीसीतासुधानिधौ

# तृतीयस्तरङ्गः

जयति जानकीजन्मभूरियं
श्रयति चैश्वरी शाश्वतीह वै।
दयत ईश्वरो दान्तदुर्मदो
मयत उत्सुका माऽत्र मातृभृत्।।१।।

जनकनन्दिनी जन्तुचन्दिनी कनकमंजरी कैकजित्वरी।
वनरुहानना वन्द्यकानना तनुत ई सुखं तान्ततापका।।२।।

तृणयते सुखं त्रिप्रभावजं व्रणयते व्रणं वर्धितामयम्।
क्षणयते क्षणं क्षीणपातकः क्वणितमम्ब ते कर्णयन् कृती।।३।।

जननि ते दया जातु चेत् भवेज्जनमिमं जराजन्मतो नयेत्।
मन इदं मया मातु ते पदे तनय तापितं त्वं महीसुते।।४।।

न हि पिता न मा नैव बान्धवा न हि सखा सुखं नैव भूतले।
न हि गृहं धनं नैव शान्तिदं न हि दिवानिशं नाकपे श्रुतिः।।५।।

जय जरामयं जातु जानकि क्षयमियादघं क्षामकस्य मे।
श्रयतु ते पदं श्रान्तकं मनो मय मयेह मां मैदिनेयि भो।।६।।

शरणमेमि भो शान्तकः पदं मरणतस्त्रसन् मन्मथी व्यथी।
धरणिजे धरन् धूलिधाम ते चरणजं च के चाकये शुभे।।७।।

नहि जहातु मां नाकपालिका नहि प्रयातु ते नर्मदा दया।
नहि जिहासतु त्वत्पदं सुतं नहि जिघत्सतु त्वय्यमुं कलिः।।८।।

जहिहि नो जनं जानकि क्वचित् क्व हि गतिं श्रये कांचिदामयी।
न हि समीक्ष्यतां नाशकं ह्यघं जहि जनावने जीवयातनाम्।।९।।

विजयतां विभुर्वीरवल्लभा स्त्रजयतां स्त्रजः सन्मतिश्च ते।
व्रजयतां हरिं वैष्णवान् कुजा ध्वजयतां मनो ध्वान्ततो मम।।१०।।



अये श्रान्त स्वान्त व्यथितहृदयं भावितभयं
भवे भ्रामं भ्रामं श्रममथ निकामं किल वहत्।
कथं कान्तारेऽस्मिन् विलसितविकारे तु म्रियसे
कृपाकूपारं त्वं शरणय कुजांभोजचरणम्।।११।।

अवेक्ष्यागोजातं जनितपविपातं निजमथो
अलं भीत्वा कृत्वा खलु खलकशोकं मम मनः।
समुद्धर्तुं दीनान् कलिसलिलमीनान् जलनिधेः
कृपा नावं विभ्रद् जयति जयजाग्रज्जनकजा।।१२।।

कदा पुण्यारण्ये बुधजनशरण्ये भगवतीं
श्रियं दर्शं दर्शं परममिह हर्षं हृदि वहन्।
अये सीते मातः कुरु कुरु कृपां मय्यघवति
प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान्।।१३।।

कदा पुण्यारण्ये विबुधसदरण्ये शरणदे
समुद्भूतां सीतां जनकहलतो वै धरणितः।
मुहुर्ध्यायं ध्यायं धृतशिशुतनुं राजतनयां
पदे नामं नामं निमिषमिव नेष्यामि दिवसान्।।१४।।

कदा पुण्यारण्ये बुधवरवरण्ये वनवरे
शुभं सीताकुण्डं श्रितसुकृतकाण्डं शुचिजले।
मुदा मज्जं मज्जं क्षपितमलमज्जं मनसिजं
धिया धर्षं धर्षं निमिषमिव नेष्यामि दिवसान्।।१५।।

कदा तां खेलन्तीं कनकलतिकाकीर्तितरुचं
विराजद्वानीरे शिशिरितसमीरे सुसरितः।
विलोलद् कापोलस्पृशघनघटा संमितकचां
तटे दृष्ट्वा सीतां दृशमथ करिष्यामि सुदृशम्।।१६।।

कदा शम्पां चम्पां कनकलतिकां कां च कदलीं
विधुं विद्युल्लेखां शिशिरशशिलेखां शशिकरम्।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved
http://jagadgururambhadracharya.org/

पिकीं कीरं हंसीं शिशुहरिणिकां खंजनसुतां
तुषाद्यन्तीं सीतां पुर इह करिष्ये नयनयोः।।१७।।
कदा दर्शं दर्शं द्युतिदलितसौदामिनिमदां
चिरं ध्यायं ध्यायं शिशुहरिणनेत्रां विधुमुखीम्।
कलं कीतं कीतं विशदविनयां राजतनयां
शिशुं सीतां प्रीतां मुदमहह मे वक्ष्यति मनः।।१८।।
कदा दर्शं दर्शं कलकलितकारुण्य लहरीं
हरीष्टां संहृष्टां त्रिभुवनविशिष्टां शिशुमहम्।
रजः स्फीतां प्रीतां पुनरपि च सीतां भगवतीं,
प्रशान्तं मे स्वान्तं सुखमनुभविष्यत्यनुपमम्।।१९।।
कदा कुंचत्केशां कलितशिशुवेषां नृपसुतां
स्खलन्तीं साम्रेडं पुनरपि चलन्तीं स्मितमुखीम्।
समाहूयारोप्य प्रगलितकलङ्कं पुनरहं
चिरं स्वाङ्कं काङ्कं सुखमनुभविष्यामि शुभगम्।।२०।।
कदा दान्तां शान्तां विलसितदिगन्तां निजरुचा
लसत् कुंचच्चंचच्चिकुरविमदद् बालमधुपाम्।
पृथिव्यां खेलन्तीं रजसि निभृतां पार्थिवसुतां
श्रियं क्रोडे कृत्वा सुखविगलिताश्रोऽस्मि भविता।।२१।।
कदा खेलं खेलं जलजकरजैः कन्दुकमसौ
स्खलन्ती धावन्ती मुहूरथ चलन्ती चलदृशी।
समञ्चन्ती भाग्यं सुशिशुचरितैर्मैथिलभुवः
सुदेही वैदेही मम पुर उपेष्यत्यवनिजा।।२२।।
कदा दक्षस्कन्धं जरितजनबन्धं नृपसुतां
समारोप्यारोप्य स्वहृदयमथो वत्सलरसम्।
मुहुश्चुम्बं चुम्बं सुमसृणकपोलं कुजनुषः
सुखं यास्याम्यद्धा विगलितविकारं ह्यधिभवम्।।२३।।



कदा तिष्ठन्तीं स्वां जनकतनयामंबुजदृशं
पुरः पूर्णां तूर्णां स्वशिशुचरितायेड्यचरिताम्।
समाहूयाद्धाहं चपलचपलां स्वाङ्कमनघां
मुदा नर्तं नर्तं निखिलजननीं खेलय इमाम्।।२४।।
कदाहं श्रीसीतां गुणगणपरीतां शुचितया
समाब्रीड्यद् गङ्गां विहितभवभङ्गां भगवतीम्।
सुतां भूमेः पूतां सुभगशिशुभूतां भवभवां
भवानीतां पीतां प्रमुदमनसा लालय इमाम्।।२५।।
कदा दिव्या नव्या सततमथभव्या भवभयं
तुदन्ती खेलन्ती जनकभवने बालवपुषा।
वदन्ती स्वव्यक्तं कलकिलकितैः प्रीणितपिता
कराब्जं श्रीसीता शिरसि मम शं धाष्यति सुखम्।।२६।।
कदा किशोरीं मिथिलाधिपस्य
श्रीरामचन्द्रास्यविधोश्चकोरीम् ।
अङ्कं समारोप्य सुवत्सलाढ्यो
मूर्धन्यवाघ्राय च लालयिष्ये।।२७।।
कदा नु कारुण्यकलैकमूर्तिं मनोरथानां परमैकपूर्तिम्।
स्फूर्तिं सतां साधनभावनानां साक्षात्करिष्ये मिथिलेशपुत्रीम्।।२८।।
कदा नु गायन्गदितेड्यगाथां मनो विराजज्जगदेकनाथाम्।
सतीं सनाथां नरनाथपुत्रीं सीतां विधास्ये नयनातिथिं वै।।२९।।
मन्ये स्वकीयं किल भागधेयं सतां विधेयं परमप्रमेयम्।
यज्जानकीपुण्यपदारविन्दं मन्मानसं सद्मसरी करोतु।।३०।।
जहातु मां काममथो तृणाय मत्वा जगत्या जनता न चिन्ता।
चिन्तामणिः किन्तु सतां किशोरी न हातुमिच्छेन्मिथिलाधिपस्य।।३१।।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved

http://jagadgururambhadracharya.org/

यदापि जन्मास्तु ममात्र लोके स्वकर्मतो योनिषु कासुचिद् वै।
तदैव सीतां रघुवीरपत्नीं ध्यातुं च गातुं समयो मम स्यात्।।३२।।
न स्वर्गसौख्याय न मुक्तये वा न भुक्तयेऽहं स्पृहये कदाचित्।
सैरध्वजीकीर्तनमेव कर्तुं दिवानिशं वै स्पृहयालुरस्मि।।३३।।
जानामि यद्यप्यहमल्पभाग्यो मनोरथो में गुरुतो गरीयान्।
तथापि जानामि जनेन्द्रजायां सीतां वदान्यां न ततो निराशः।।३४।।

कदा कमलपत्राक्षीं लसल्लालित्यवल्लरीम्।
करुणामृतकल्लोलां सीतां नेष्याम्यहं दृशौ।।३५।।

विषयेक्षुरसोद्भूतदुर्मदं मलिनं चिरम्।
स्वभर्तृपदपाथोजे सीते सिनु मनोगजम्।।३६।।

हे सीते हे जनकतनये हे खरार्येकपत्नि
हे भक्तानामभयसुखदे हे मनोज्ञैकमूर्ते।
हे श्रीरामप्रणयिनि शुभे हे जगत्येकमात-
र्मां मा हाषीर्हसितचरितं पाहि पाह्यम्ब पाहि।।३७।।

असारे खलु संसारे कान्तारे कामलालसम्।
भ्रमन्तं पाहि मामम्ब मिथिलाधिपकन्यके।।३८।।

भ्रामं भ्रामं भवे भौमि क्रामं क्रामं क्रमानहम्।
श्रामं श्रामं परं भ्रान्तो रक्ष मां रामवल्लभे।।३९।।

यदि न रक्षसि मामवधेश्वरि
क्व खलु यामि वदाशु विलोचनः।
पतितपावनि पावय पापिनं
जननि पालय कम्प्रकुलव्रतम्।।४०।।

त्रातो जयन्तः कृतकिल्विषो वै यया त्वया कारुणिकैकमूर्त्या।
सा ते कृपागाधसुधैकसिन्धुर्मत्पालने किं समशुष्यदार्ये।।४१।।



मा मा निराशं कुरु मामनाथं
मे मे सनाथं कुरु पापनाथम्।
विदेहकन्ये दिश रामभक्तिं
सीते द्विजायाथ च याचते मे।।४२।।

याया याया यया यायी यायी यायी यया यया।
यया यया यया याया याया याया यया यया।।४३।।

**भक्ति टीका–** या अया याया यया यायी यया यायी यया यायी यया या यया या यया या यया याया यया याया इत्यन्वयः।

या सीता, अया अकारो रामचन्द्रः तं याति प्राप्नोति इति अया, कर्मकारकं अं रामचन्द्रं उपपदं मत्वा 'आतोऽनुपसर्गे कः' इत्यनेन प्रापणार्थक या धातोः कः प्रत्ययः अनुबन्धकार्ये धातोः आकारस्य लोपे टापि सवर्ण दीर्घे याया पुनः याया यकारः, ब्रह्मा अकारः विष्णुः पुनः यकारः महेशः ते सन्ति उद्भवस्थितिप्रलयकारिणः अधिकारिणः यस्याः सीतायाः सा याया ब्रह्माविष्णुशङ्कराधिकारवती, पुनः यिः कामः तस्य पिता अः विष्णुः इति यःतं याति जनयति इति यया, कामपितृहरेर्जननी सीता, या ब्रह्माणी पुनः यः शिवः तस्य पत्नी यी, या च यी च यायौ तयोः यी शोभा यस्याः सा यायी, ब्रह्माणीपार्वत्योरपि शोभाप्रदा, यया सीतया यं ब्रह्माणं यातुं तच्छीलः इति यायी ब्रह्मजनयिता भगवान् रामो जातः, पुनः यया सीतया कर्णभूतया भगवान् रामः, यायी यं शिवं याति पितृत्वं गच्छति स यायी अर्थात् सीताशक्त्यैव रामः शिव प्राकट्यवान् जातः। या सीता यया गन्तृ पुनः या सीता यया विष्णुगन्तृ पुनः या सीता यया शिवगन्तृ तथा याया या जानकी अं रामचन्द्रमपि याति पुनः यी लक्ष्मीः अः विष्णु इति यौ, ताभ्यां यायते गम्यते लभ्यते वा सा यया, पुनः येन शिवेनापि यायते गम्यते इति यया शिवस्यापि सेव्या, इह उभयत्र यकारोपपदात् या धातोः कर्मणि क प्रत्यये आकार लोपे टापि यया शब्द निष्पत्तिः।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved

http://jagadgururambhadracharya.org/

**रारा रारा ररा रारा रारा रारा ररा ररा।**
**रारा रारा ररा रारा रारा रारा ररा ररा।।४४।।**

**भक्ति टीका–** अन्वयः सुगमः पद्येऽस्मिन् एकाक्षरीकोशेन नामैकदेशग्रहणे नामग्रहणं इति सिद्धान्तेन च व्याख्यानं क्रियते। तत्र प्रथम राकारः राक्षस वाचकः, द्वितीयश्च अग्निज्वालावाचकः एवं राः राक्षसाः तेषां रा अग्निज्वालास्वरूपिणी सीता इति रारा, पुनः रा रावणः तस्यापि रा विनाशाय अग्निज्वालामयी इति द्वितीय रारा शब्दार्थः, पुनः राः वायुः तस्यापि रा हनुमत् सदृश पुत्र पोषणेन शक्तिप्रदायिनी, पुनः रा राष्ट्रं भारताख्यं तस्मै अपि अं भगवन्तं रामं राति इति रारा, पुनः रः रामचन्द्रः तस्मै आ आदरेण रा राज्यलक्ष्मीः यया सा रारा श्रीरामराज्यलक्ष्मी प्राप्ति हेतुः, पुनः रः भार्गवो रामः तमपि आरमयति इति रारा पृषोदरादित्वात् मकार लोपः" परमात्मस्वरूप बोधनेन परशुरामस्यापि शान्तिप्रदायिनी श्रीसीता। पुनः रं रामप्रेमरसं राति भक्तेभ्यो ददाति या सा ररा, पुनः रं रामभक्तिं राति भक्तेभ्यो ददाति इति ररा। पुनः राधनं भगवदाराधनात्मकं राति इति रारा भक्तेभ्यो भगवदाराधनधनदात्री, पुनः रा रासः तं राति रामचन्द्राय ददाति इति रारा, पुनः ररा रः विषयरसः तस्य कृते रा अग्निस्फुलिङ्गरूपिणी भष्मविधायिनी। पुनः रारा रा रामः तस्यापि रा धनस्वरूपिणी, पुनः राः रामाः तासु रा राजते इति रारा सकलमहिलामण्डन भूता। पुनः रः श्रीरामरूपवेदः तस्मिनः रः रसः यया सा ररा वेदानन्द करणीभूता, पुन राः श्रीरामभक्ताः तेषु रः भजनरसः यया एवं भूता श्रीजनकनन्दिनीसीता विराजते। अत्र 'रश्च रामेऽनिले वह्नौ' इति एकाक्षरकोशेन रेफस्य त्रयः अर्थाः। शेषाः नामैकदेशाः।

**लालीलालीललला लाली लालीलाली ललेलला।**
**ललेलाला ललालाली लालीलाली ललौ ललौ।।४५।।**

**भक्ति टीका–** अन्वयः सुगमः। लाला शिशूनां मुखजलं सा अस्ति येषां ते लालिनः सीतावात्सल्यपात्रभूताः तेषां ईः लक्ष्मी शोभा इति लाली



तां अपि लालयति पुष्णाति इति लालीलाली भगवत् प्रीतिः तस्या अपि ईं शोभां ललयति विलसयति इति लालीलालीलला निजवात्सल्यभाजन पालयित्री प्रीतिविलासलालिनी एवं विधा सीता, पुनः लाली जनकेन लालिता सीता, पुनः लाली पृथुना लालिता पृथ्वी तस्याः लाली वात्सल्यपात्रभूता पुत्रीसीता पृथुलालित पृथ्वीपुत्री इति भावः। पुनः ललेलला लला लालनपात्रभूता इला सरस्वती यस्य स ललेल' रामचन्द्रः तमपि लाति भक्तानां अग्रे आविर्भावयति इति ललेलला सरस्वतीवत्सल श्रीरामविभावयित्री। पुनः लाल्यते पाल्यते वत्सलसुधया सीतया यः सः ललः लक्ष्मणः तस्य इलां सरस्वतीं लाति जनक राजसभायां प्रेरणया प्रस्तौति इति ललेलाला। पुनः ललयति लाडयति इति लला सुनयना तस्याः लाली पुत्री सीता एवं भूता पृथुलालितायाः पृथिव्याः लाली पुत्री श्रीसीता लं गन्धतत्वं लीयते विराजते यस्यां सा ललिः पृथ्वी, तस्यां ललौ धरण्यां सीता आत्मानं ललौ आविर्भावयामास।

**ववे वावे ववा वावी वावीवावी ववाववा।**
**ववावावा ववावावौ वाववावौ ववौ ववौ।।४६।।**

**भक्ति टीका–** अन्वयः सुगमः। संस्कृते वकारः अमृतवाची एवं उः शिवः अः विष्णुः यण्सन्धौ वौ एवं विधयोरपि द्वयोः शब्दयोः पद्येऽस्मिनः सुतरां प्रयोगः। तथा च वं अमृतं भगवद्भक्तिरूपं वाति सूचयति इति ववं मिथिला धाम तस्मिन् ववे, एवं वं भगवत् प्रेम वाति वहति इति वावं श्रीअवधधाम तस्मिन् वावे अवधधाम्नि, ववा द्वयोरपि धान्नोः वाति मिथिलायां पुत्रीरूपेण अयोध्यायां पुत्रवधुरूपेण गच्छति इति ववा। पुनः वाति सर्वत्र धर्ममर्यादां सूचयति इति ववः रामचन्द्रः तस्येयं स्त्री इति वावी सीता, पुनः वावीवावी वं अमृतं अवति रक्षति तच्छीलः इति वावी रामचन्द्रः तस्यापि वं प्रेमरसामृतं अवति रक्षति इति वावी इह कर्मण्यणि दीप् धर्ममर्यादारक्षक श्रीरामप्रेमरसरक्षिका वावीवावी सीता। पुनः वं अन्नरसं वयति स्वस्मिन् स्थापयति इति ववा पृथिवी तस्याः अपि वं वत्सलरसं वयति स्वस्मिन्

© Copyright 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.
http://jagadgururambhadracharya.org/

समाहरति इति ववावववा सीता। एवं ववायां पृथिव्यां या वनवासकाले ववा अतिसयेन वाति गच्छति, इह वाधातोर्यङ्लुङन्तप्रयोगः। एवं भूता सतत वनपरायणा सीता। ववावावौ ववा पृथिवी वा अमृतमयी भक्तिः ते अवतः रक्षतः एवं भूतौ रामलक्ष्मणौ, पुनः वां धर्ममर्यादां वं भजनरसं वां संबन्धमर्यादां अवतः रक्षतः एवं विधौ श्रीरामलक्ष्मणौ ववौ सूचितवती पुनः ववौ रामं पतित्वेन लक्ष्मणं पुत्रत्वेन च प्राप्तवती।

**शशीशाशी शशाशाशीशीशाशाशी शशीशशा।**
**शाशीशाशीशशा शेशा शेशाशेशाशिशुः शशा।।४७।।**

**भक्ति टीका–** अन्वयः सुगमः। शशी चन्द्रः शशिनः चन्द्रस्य ईशा स्वामिनी पार्वती शशीशा तां आसमन्तात् श्यति तनूकरोति इति शशीशाशी सीता चन्द्रेश्वरी पार्वती शोभाल्पकारिणी इति भावः। पुनः शशाशाशी शशः अस्ति अस्मिन्निति शशः भावः। पुनः शशाशाशी शशः अस्ति अस्मिन्निति शशः चन्द्रः, अर्श आदित्वादच् तस्मिन् आशा अभिलाषः यस्याः सा शशाशा रोहिणी तामपि आसमन्तात् श्यति तनू करोति निजैकनारीव्रत–पतिसौभाग्यगौरवेण रोहिण्याश्च व्यभिचारपतितया तां हसति इति शशाशाशी सीता, पुनः ईशः शिवः तस्य स्त्री ईशी शिवा सा ईशा स्वामिनी यासां ताः ईशीशाः पार्वती प्रमुखा शक्तयः ताः अपि आसमन्तात् श्यति इति ईशीशाशा पुनः आ लक्ष्मी तामपि श्यति तनूकरोति इति आशी साचासौ सा इति शशाशाशीशीशाशाशी। शशीशशा शशश्चन्द्रः तस्य स्त्री शशी रोहिणी तस्याः शं शमलं श्यति समापयति इति शशीशशा, रोहिणीसङ्कटहारिणी सीता। शशानां चन्द्राणां समूहः शाशी पुनः तस्यापि शमलान् आसमन्तात् श्यति इति शाशीशाशी निजनिर्मलकीर्त्या सकलसङ्कटहारिणी शिवशक्तिः तस्या अपि शं शमलं श्यति इति शाशीशाशीशशा चन्द्र समूहकलङ्कनाशक शिवशक्तिशमलनाशिनी, शः शेशः लक्ष्मणावतारः तस्य ईशा इति शेशा, पुनः शेशाशेशाशिशुः शह शेशः ईशः धारणतया यस्याः सा शेशा पृथिवी, पुनः आसमन्तात् शं कल्याणं येन स अशः विष्णुः सोऽपि पतित्वेन ईशः



यस्याः सा अशेशा विष्णुबल्लभा पृथिवी एव शेशा एवं अशेशा शेशाशेश शेशधारिताविष्णु पत्नी पृथिवी तस्याः शेशाशेशायाः पृथिव्याः शिशुः कन्या सीता शशा शमलनाशिनी भवतु इति शेषः।

**षेषाषेषे षषे षेषे षेषाषेषषषे षषे।**
**षेषाषेषे षषे षेषे षेषाषेषे षषे षष।।४८।।**

**भक्ति टीका–** अन्वयः सुगमः। अत्र पद्ये षकारोऽर्थद्वये ''श्रेष्ठे नेत्रे च'' ''षश्च श्रेष्ठे विलोचने'' इति कोशप्रामाण्यात्। ईष शब्दोऽपि धातुत्रयात् 'इष गतौ' 'इषु इच्छायां' 'इष आभीक्ष्णे च'। तथा हि षं रामं इष्यन्ति गच्छन्ति इति षेषाः श्रीरामज्ञातारः तानषान् इच्छति पुत्ररूपेण लालयितुं इच्छाविषयी करोति इति षेषाषेषा तत् संबुद्धौ हे षेषाषेषे, पुनः 'षः श्रेष्ठो रामः तस्यापि षा दृष्टिः तत् संबुद्धौ हे षेषाषेषे, पुनः षः श्रेष्ठो रामः तस्यापि षा दृष्टिः तत् संबुद्धौ हे षषे, पुनः षान् श्रेष्ठान् वैष्णवान् आभीक्ष्णेन इष्णाति कृपापात्री करोति इति षेषा तत् संबुद्धौ हे षेषे कृतवैष्णव श्रेष्ठ पात्रे। पुनः षेषाषां वैष्णवेशानां अः रामः षः श्रेष्ठः येषां ते अषाः तेषां इच्छाविषयीभूताः तेषां षेषाषेषाणां षषा श्रेष्ठ श्रेष्ठा तत् संबुद्धौ षेषाषेषषषे, पुनः षषे हे लोचनलोचने।

षेषान् श्रेष्ठेच्छाविषयीभूतान् आसमन्तात् षेण श्रैष्ठ्येन इष्णाति तत् संबुद्धौ हे षेषाषेषे, षाः श्रेष्ठाः तेषु षं लोचनं यया सा षषा तत् संबुद्धौ हे षषे, षान् भजनरसिकान् इष्यति गच्छति इति षेषा तत् संबुद्धौ हे षेषे, एवं षैः इष्यन्ते इति षेषाः, अः रामः षः श्रेष्ठः येषां ते अषाः ते षेषाषाः तान् इच्छति इति षेषाषेषा तत् संबुद्धौ हे षेषाषेषे। हे षषे षेषु षं भगवत्तत्वज्ञाननेत्रं यया तताभूते षष मामपि लब्ध श्रैष्ठ्यभजनलोचनं कुरु।

**सीसे सीसे ससे सीसे सी सी सी सीससे ससे।**
**सास सास ससे सास से से से से ससासस।।४९।।**

**भक्ति टीका–** अन्वयः सुगमः। सीं सीमानं स्यति इति सीसा तत्

© Copyright 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved

http://jagadgururambhadracharya.org/

संबुद्धौ हे सीसे, पुनः सीः सीमन्तिनीः स्यति तनूकरोति इति सीसा तत् संबुद्धौ हे सीसे, पुनः सीं सीतां हलपद्धतिं निमित्ती कृत्य सूयते इति सीसा तत् संबुद्धौ हे सीसे, पुनः सं संसारे स्यति तनूकरोति इति ससा तत् संबुद्धौ हे ससे, पुनः सी हे साकेत सीते, सी हे मिथिला सीते, सी हे अयोध्या सीते, पुनः सी हे अरण्य सीते, इः कामः तस्य सं सङ्कटं स्यति तत् संबुद्धौ इससे तां सङ्कटनाशिनी, ससे संसृतिनाशिनी। ससे सन्तापनाशिनी, से हे सीते, पुनः से हे युवराज्ञि, पुनः से हे पट्टमहिषि, से हे सम्राज्ञि! असनं हिंसनं तेन सह वर्तमानं सासं तत् समाचर, पुनः चतसृषु अवस्थासु सास आसमन्तात् सस इति भूयसी प्रार्थना।

**हाहाहूहूहहेहे हे हाहाहूहूहहे हहे।**
**हाहाहाहाहहाहाहा हाहा हाहाह हाहि हे।।५०।।**

**भक्ति टीका–** अन्वयः सुगमः। पद्येऽस्मिन् हकारः चतुर्षु अर्थेषु प्रयुक्तः हः हस्तः पुनः हः हरिः पुनः हः हरः, पुनः हः हर्षः। तथा हि हाहाहूहूनामकौ गन्धर्वौ ताभ्यां धनुर्भङ्गकाले ऊहः ऊहितः हः हस्तः यस्य सः रामः तस्मिन् हे हरौ जिहीते इति हा तत् संबुद्धौ हे अर्थात् धनुर्भङ्गकाले हाहाहूहूगन्धर्वाभ्यां यस्य हस्तस्य ऊहः कृतः तं श्रीहरिं रामं या पत्नीरूपेण प्राप्ता एवंभूते सीते एवं रावणवधकाले राक्षसीविधवानां हाहाशब्देन वानराणां हूहूशब्देन च ऊहः तर्कित हः हर्षः यस्याः तत् संबुद्धौ हाहाहूहूहहे! हेन हरेण हीयते गम्यते सेव्यते इति हहा तत् संवुद्धौ हे हहे! सीते, हाहा इत्यादि कुर्वन्तं मां अ हाहि मा त्यज। इह चतुर्थचरणस्य हाह इत्यत्र हा अ ह इति पदच्छेदः, अकारश्च निषेधवाची अव्ययः, हाहि इति हानं हा भावप्रत्ययान्तः तां आचरति इति हाति तस्य लोट्लकार मध्यमपुरुष प्रथमवचनैकरूपं हाहि।

**सीता सदा दीव्यतु देवदीप्तिः सीता सदा दीव्यतु देवदीप्तिः।**
**सीता सदा दीव्यतु देवदीप्तिः सीता सदा दीव्यतु देवदीप्तिः।।५१।।**



**भक्ति टीका–** इह एक एव चरणः महाछेकाविधया द्वादशकृत्वः आवृत्तः। तथाहि सूयते चराचरं या सा सीता देवमयी दीप्ति यस्याः सा सदा दीव्यतु श्रीमिथिलायां कन्यास्वरूपा क्रीडतु। पुनश्च सवती संसारं पालयति या सा सीता देवानुग्राहादीप्तिः यस्याः एवं भूता दीव्यतु सदैव रत्यादीः विजिगीषतां। तथा च श्यति संसारं नाशयति इति सीता देवहितैषिणी दीप्तिः यस्याः एवं भूता सदा दीव्यतु कौतुकागारे श्रीरामकेण स व्यवहरतु द्यूतं क्रीडतु इति भावः। पुनः स्यति क्लेशं हरति या सा सीता देवकष्टनाशिनी दीप्तिः यस्याः तथाभूता दीव्यतु सदैव द्योतताम्।

**सीता सदा दीव्यतु देवदीप्तिः सीता सदा दीव्यतु देवदीप्तिः।**
**सीता सदा दीव्यतु देवदीप्तिः सीता सदा दीव्यतु देवदीप्तिः।।५२।।**

**भक्ति टीका–** देवरंजिनी दीप्तिः यस्याः एवं विधा सूवतीति सीता सर्वप्रेरिका सदा दीव्यतु श्रीरामं स्तौतु। पुनः देवानुकूला दीप्तिः यस्याः एवं भूता सिनोति रामं प्रेमरज्जुविशेषेण बध्नाति सा सीता सदा दीव्यतु निरन्तरं मोदतां। पुनश्च देवसंबन्धिनी दीप्तिः यस्याः सा सीयते रामेणापि बध्यते या सा सीता सदा दीव्यतु निरन्तरं माद्यतु। पुनश्च देवसंसृतिहारिणी दीप्तिः यस्याः एवं भूता स्यायते भक्तान् प्रति गच्छति या सीता सदा दीप्यतु भक्तहृदये सुखशयनं करोतु श्रीराघवेण सह।

**सीता सदा दीव्यतु देवदीप्तिः सीता सदा दीव्यतु देवदीप्तिः।**
**सीता सदा दीव्यतु देवदीप्तिः सीता सदा दीव्यतु देवदीप्तिः।।५३।।**

**भक्ति टीका–** देवानां भवभंजिनी दीप्तिर्यस्याः एवंभूता सीं सीमानं इता सौन्दर्यसारं गता या सा सीता सदा दीव्यतु कान्तिमती भवतु। पुनश्च देवानां सर्वस्वभूता दीप्तिः यस्याः तथाभूता सीता सीरं निमित्तीकृत्य इता प्राप्ता सदा दीव्यतु शोभां अञ्चतु। पुनश्च देवानां भक्तिप्रदायिनी दीप्तिर्यस्याः सा सीता सीमन्तिनीः इता प्राप्ता सा सदा दीव्यतु सदैव श्रीरामकमनीया भवतु। पुनः देवानां वन्दनीयादीप्तिर्यस्याः सा सीता सिन्धुजया इता सेवार्थं प्राप्ता सा सीता सदा दीव्यतु शोभां अञ्चतु। पुनः देवानां वन्दनीयादीप्तिर्यस्याः

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved
http://jagadgururambhadracharya.org/

सा सीता सिन्धुजया इता सेवार्थं प्राप्ता सा सीता सदा दीव्यतु सदैव मम नेत्रपथं गच्छतु।

**हे देवि हे जनकजे धरणीसुते हे**
**हे रामचन्द्रमुखचन्द्रचकच्चकोरि।**
**हे लोकपालमहिते करुणैकसिन्धो**
**सीते करिष्यसि कदा मयि कारुणिं स्वाम्।।५४।।**

**इत्थं जगद्गुरुमहाकविरामभद्रा-**
**चार्येण वै गिरिधरेण सुगीतसीते।**
**सीतासुधानिधिमये रघुरामसीता-**
**भक्तिं प्रयच्छतु च नः तरलस्तृतीयः।।५५।।**

**।।इति तृतीयस्तरङ्गः।।**



© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved.

卐 श्रीः 卐

नमो राघवाय

श्रीसीतासुधानिधौ

## चतुर्थस्तरङ्गः

यत् पादपद्मरससारघमाजुषाणा
स्वर्ग्यं सुखं जहति जातु तृणाय मत्वा।
भक्त्येकतानमतयो यतयो यतन्त-
स्तं जानकीचरणरेणुमहं भजेऽद्धा।।१।।
यन्नामधेयममलं कलिकल्मषघ्नं
सीतेति वर्णयुगलं सुबलं श्रुतीनाम्।
श्रीरामचन्द्रजपमन्त्रमुदाहरन्ति
श्रीजानकी मम मनो ह्यधिरोहतात् सा।।२।।
यद्रूपसौभगमजोद्भवभागधेयं
दिव्यं वशीकरणमब्जदृशः खरारेः।
श्रीरामचन्द्रमृदुमानससन्निपानं
तां जानकीमहरहो नितरामुपासे।।३।।
यत् पार्वणेन्दुमुखमंजुसुधासवोत्को
रामोऽपि नोपरमते किल सीधुपानात्।
तां राघवीं जनकवैभववैजयन्तीं
सीतां पुनीतचरितां मनसा स्मरामि।।४।।
यत् पादपद्मनखचन्द्रचकोरभावं
लब्धुं तपन्ति यतयोऽतितरां तपांसि।
तां रामभद्रभवनैकमनोज्ञलक्ष्मीं
लक्ष्मीसहस्त्रमहितां महितां महीये।।५।।
यस्याः कृपाकमलकोमलदृक्कटाक्ष-
निक्षेपतो भवभयं भजकाः क्षिपन्ति।



तज्जानकीचरणपङ्कजरम्यरेणु-
क्षेपं मनस्यहमथो नितरां लषामि।।६।।
यत् पादपद्मरजसा रज उत्क्षिपन्तः
सन्तः प्रशान्तमनसो विलसन्ति सन्तः।
तं जानकी पदपयोरुहसद्मरेणु-
मिच्छामि वोढुममलं शिरषा सदाऽहम्।।७।।
यद्ध्यानतः सुकृतिनः कृतकिल्विषाणां
घ्नन्ति प्रसह्य निमिषात् किल कोटिकोटीः।
तज्जानकीपदपयोजयुगं युगैः कै-
र्लब्धाह ईड्यचरितं ननु जन्मभिः कैः।।८।।
हे रामभद्रवदनांबुजभानुभानो
हे रामचन्द्रमुखचन्द्रचरच्चकोरि।
हे पार्थिवि प्रणतभूमिपतेः किशोरि
सीते प्रसीद वरदे हृदि मे निषीद।।९।।
सीते प्रसीद निमिनन्दिनि मे प्रसीद
साध्वि प्रसीद जनचन्दिनि मे प्रसीद।
भौमि प्रसीद भवभंजिनि मे प्रसीद
देवि प्रसीद हरिरंजिनि में प्रसीद।।१०।।
क्वचिल्लसन्तीं शुकासारिकाभिः
क्वचित्स्पृशन्तीं तरुपल्लवानि।
क्वचित्कशन्तीं धनुरश्वमैशं
मह्यां महे मातृकमावसन्तीम्।।११।।
गत्या मरालीमपि शिक्षयन्तीं
गिरा पिकीं क्वापि च दीक्षयन्तीम्।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved.

http://jagadgururambhadracharya.org/

सतां मनांस्येव समीक्षयन्तीं
श्रियं श्रये त्रैहुतमावसन्तीम्।।१२।।
क्षमाक्षमां कीर्तिमिमां च कीर्ते-
र्धियो धियं धीरजनैकसेव्याम्।
गौर्याश्च गौरीं सुगिरो गिरं तां
लक्ष्म्याश्च लक्ष्मीं श्रय आवनेयीम्।।१३।।
यन्नामधेयामृतमापिबन्तो
मन्यन्त ईड्याश्च तृणाय सोमम्।
तां श्रीविदेहान्वयवैजयन्तीं
सीतां श्रये चेतसि वै जयन्तीम्।।१४।।
यस्याः प्रभावं गिरिशो गणेशः
शेषोऽपि नालं गदितुं युगैश्च।
तां शक्तिवर्यां रघुवीरभार्या-
मार्यामये भङ्क्तुमथामयं स्वम्।।१५।।
यां नारदो गायति गूढ़गानो वीणां प्रवीणां रणयन्नुदाराम्।
तां नारदस्यैव सुयोग्यशिष्यां विशारदां शारदमामनामि।।१६।।
प्रपद्यमानां प्रभुपादपद्मं
रामेति रामेति सदा जपन्तीम्।
तां दूग्धमत्यास्तटमाश्रयन्तीं
सीतां श्रये मैथिलकीर्तिकेतुम्।।१७।।
श्रीणाति पापानि च या जनानां
श्रीणाति या दुःखचयं सतां च।
या श्रीयते संश्रयते हरिं या
श्रियं श्रये तां शरणार्थभूताम्।।१८।।



विहाय लोकं कलितैकशोकं
तोकः समुत्सृष्टममत्वलोकः।
कोकी भवन्तीं ननु रामभानौ
श्रीजानकीं तां शरणं व्रजामि।।१९।।
संसारकान्तारदवाग्निदग्धो दिग्धोऽथ नित्यं विषयैकपङ्के।
व्रजामि सीतां वरदां वरेण्यां जगच्छरण्यां शरणं शरार्तः।।२०।।
शरणीकरवाणि कौमुदीं रघुचन्द्रस्य कला कलेवराम्।
मिथिलेशसुतां महाद्भुतां ननु सीतां रघुवीरवल्लभाम्।।२१।।
शरणीकरवाणि कैरवीं भगवच्चन्द्रमसो धनुर्भृतः।
मिथिलेशकिशोरिकामहं रघुवीरस्य सुचित्तचोरिकाम्।।२२।।
शरणीकरवाणि कौतुकाकलितां कोसलजास्नुषामहम्।
भरतादिप्रजावतीं सतीं ननु सीतां रघुनाथवल्लभाम्।।२३।।
शरणीकरवाणि कांचनीं सुषमां वै तुदतीं तनुत्विषा।
रघुचन्द्रसुधाचकोरिकां वनितां भूमिभृतकिशोरिकाम्।।२४।।
शरणङ्करवाणि तावकं ननु सीते चरणांबुजद्वयम्।
यदमन्दरसाशवेप्सवस्त्रिदिवं नोऽभिलषन्ति साधवः।।२५।।
शरणङ्करवाणि कारुणीं तरुणीं ते तरुणेन्दुशेखरः।
अशुभं विबभार विग्रहं यदभीप्सावशमत्तमानसः।।२६।।
शरणङ्करवाणि कारुणीं तरुणीं ते तरुणप्रभे कुजे।
यदनाविलवारिधारया कृतपापो हरिजोऽपि पावितः।।२७।।
शरणं शरणामि शाश्वतीं तव सीतेऽघहते क्षमां क्षमाम्।
विधवा अपि रक्षसां यया ननु पाताः कृतकिल्विषा हरेः।।२८।।
शरणं मिथिलेशकन्यका शरणं मे रघुवंशभूषणः।
शरणं पुनरेमि तावुभौ शरणं नान्यमुपैमि कंचन।।२९।।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas All Rights Reserved

http://jagadgururambhadracharya.org/

शरणं वसुधाकिशोरिका शरणं मे प्रभुराम ईश्वरः।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम्।।३०।।

जय हरिहरिजाये कांचनत्कप्रकाये
जय रघुवरमाये प्रोल्लसत् सन्निकाये।
जय निमिकुलकन्ये धन्यधन्ये वदान्ये
जय जय जय सीते देहि शं मे विनीते।।३१।।

जहि जहि जहि मायां पापकायां विकायां
जहि जहि मम पापं सन्नितापं त्रितापम्।
जहि जहि मम मोहं सद्विचारैकदोहं
जय जय जय सीते देवि मे सुप्रसीद।।३२।।

कलिकुलमललीनं पापपाथोधिमीनं
भवजलनिधिमग्नं मङ्गलेभ्यश्च भग्नम्।
शमलकुलपरीतं भीतभीतं च सीते
न जहिहि जनमेनं पाहि मां रामभार्ये।।३३।।

जयति वरदवन्द्या सर्वथैवाप्यनिन्द्या
विलसदखिलविद्या ब्रह्मविद्याऽनवद्या।
निखिलभुवनगीता वेदविख्यातगीता
सुमहितमहिसीता कापि सीता प्रतीता।।३४।।

जयति जगति नित्यं जानकीकीर्तिमाला
विगलितभवजाला भग्नकाला रसाला।
यदनघगुणराजत्प्रेमनिष्यन्दलीला
परिमलहृतचेता राघवोऽभूद्द्विरेफः।।३५।।

जयति जनकजायाभूमिसंभूतिभूता
गुणलसदवधूता भूतिभूता विभूम्नः।
विलसितहरिकन्दा भावभावन्मुकुन्दा
हरिगगनगरिष्ठा कापि सौदामिनीयम्।।३६।।



जयन्ति सीतापदपद्मरेणवः समस्तसत्साधनकामधेनवः।
असारसंसारसमुद्रसेतवः प्रचण्डपाखण्डविखण्डहेतवः।।३७।।

जयन्ति वै भानुमतीविलोचनप्ररोचना पातकपूगमोचना।
खरारिहृत्सद्मशुभाधिदेवता महीसुतामंजुमुखाब्जरोचिषः।।३८।।

जयन्ति सीतावरवाक्सुधाकणा महीसुतामंजुमुखाब्जमन्दिराः।
यदीय संसेवनसौभगाश्रया श्रुते श्रुतिश्चापि कृतार्थतां ययौ।।३९।।

जयन्ति नित्यं जगतीह जानकी
गुणासमाभग्नमहीतलव्रणा।
यदाशया नित्यमुदारदर्शना
श्रुतिश्चकाषे चकिता चमत्कृता।।४०।।

नमामि नित्यं मिथिलेशकन्यां सीतां वदान्यां किल धन्यधन्याम्।
यत्पादपाथोरुहसत्परागमरन्दमापीय विधिर्विधिज्ञः।।४१।।

सन्नूपुरं पारमहंसहंस -
सन्नीडभूतं परमं च पूतम्।
जीवातुभूतं किल वैष्णवानां
ध्यायामि सीताचरणारविन्दम्।।४२।।

समस्तशक्त्येकमनोज्ञधामं रामाभिरामं शुभगं निकामम्।
कृपैकपाथोधिमनल्पशोभं ध्यायामि वैदेहिकरारविन्दम्।।४२।।

प्रवालपाथोजसमानशोभं समुल्लसद्राघवचित्तलोभम्।
सौन्दर्यसारं विगलद्विकारं ध्यायामि वैदेहिकरारविन्दम्।।४३।।

नखप्रभाव्रीड़ितचन्द्रकान्ति कान्तं नितान्तं भुवने विभान्तम्।
सुकुड्मलाभैः करजैः परीतं ध्यायामि सीतासुकरारविन्दम्।।४४।।

कृपाकरं सर्वसुखाकरं च शुभाकरं मोदकरं जनानाम्।
अपूर्वभूतं किल वैष्णवानां ध्यायामि भौमिसुकरारविन्दम्।।४५।।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved
http://jagadgururambhadracharya.org/

श्रीरामचन्द्राननचन्द्रसोमसदैकमित्रं विलसच्चरित्रम्।
खरारिपादाम्बुजसेवनोत्कं ध्यायामि तद्भौमिकरारविन्दम्।।४६।।
शशाङ्कपङ्केरुहसौभगाढ्यं सुगण्डकं दामिनिदन्तशोभम्।
श्रीरामभृङ्गेशकृतैकलोभं ध्यायामि सीतावदनारविन्दम्।।४७।।
श्रीरामभृङ्गाधिपतीन्द्रजालं सीमन्तसन्नन्दनपुष्पमालम्।
ब्रीड्यत्तमालं नितरां रसालं ध्यायामि सीताकलकेशबन्धम्।।४८।।
ध्यायामि सीतापतिधर्मपत्नीं कौसल्ययानुष्ठितभव्यवेषाम्।
सुशेषशेषां हृतपापलेशां सीतां विनीतां श्रुतिगीतगीताम्।।४९।।
कृत्वा धनुर्भङ्गमथैशमीशः स्वयंवरे यां समुवाह भूत्यै।
राजाधिराजस्य गृहेश्वरीं तां वन्देऽनवद्यां वनितां च सीताम्।।५०।।
यस्याः समासादितसर्वशक्तिर्जघान रामो युधि रावणादीन्।
तां रामरामां विलसत् प्रणामां राज्ञीं श्रये कोसलनागराणाम्।।५१।।

श्रीजानकीचरणपङ्कजमाश्रयामि
श्रीजानकीकरकरांबुजमामनामि।
श्रीजानकीवदनपङ्कजमाभजामि
श्रीजानकीतनुरुचिं हृदये दधामि।।५२।।

सिंहासने स्थितवतीं श्रितवामभागां
रामेण सार्धमनघामभिषेककाले।
ब्रीड्यत्तमालवलितव्रततीं व्रताढ्यां
राज्ञीं भजेऽधिसुमनोऽवधमेव सीताम्।।५३।।

जीवातुभूतविभवा ननु वैष्णवानां
श्रीमैथिलीजनकवैभववैजयन्ती।
पट्टाभिषिक्तमहिषी रघुनन्दनस्य
श्रीजानकी विजयते जननीह सीता।।५४।।



इत्थं जगद्गुरुमहाकविरामभद्रा-
चार्येण वै गिरिधरेण सुगीतसीते।
सीतासुधानिधिमये रघुरामसीता-
भक्तिं प्रयच्छतु च नस्तरलश्चतुर्थः।।५५।।

।।इति चतुर्थस्तरङ्गः।।

© Copyright 2011 Shri Tulsi Peeth Seva Nyas, All Rights Reserved.
http://jagadgururambhadracharya.org/